सफलं मन्यते ज्ञन्म चिन्ताविरहितं तदा ॥६४॥
तथेति प्रतिश्रुत्यासौ सन्देशं हरिणीदृशः ।
तदाभाषणसन्तुष्टस्सर्वं चक्रे समाहितः ॥६५॥
अथ सार्थपतेर्दासं गृहीत्वा विपुलैर्धनैः ।
सुभ्रुवोऽग्रे समानीय स्थापयामास सुन्दरम् ॥६६॥
तं तु कामोपमं वीक्ष्य प्राप्तकामा मनस्विनी ।
हर्षबाष्पौघपूर्णाक्षी विमर्शमकरोत्ततः ॥६७॥
अहो किं स्वप्नमायेयं किं वा सत्यमिदं भवेत् ।
यत्पश्याम्यधुना लोके दुर्लभं प्रियदर्शनम् ॥६८॥

59a निष्प्रज्ञे. 63a दोयता.

आशा मन्मानसे नैवमासीद्विरहयामिनी ।
प्राप्नोति दीर्घतां याता प्रियमित्रोदयं क्वचित् ॥६९॥
अकस्मात्सुखिता कान्तप्राप्त्या जातास्मि साम्प्रतम् ।
शोभते विधिना साम्यं कर्तुं चेन्मानसं मम ॥७०॥
मां विना नापरा काचिद्दुःखिता संसृतौ पुरा ।
अधुना सुखसंयुक्ता प्राप्तकामापि कामिनी ॥७१॥
चिन्तातीव्रांशुसन्तप्ते विप्रयोगमरुस्थले ।
पिपासिताप्यहं तत्र भ्रमन्ती गतचेतना ॥७२॥
आश्चर्यकारिणा नित्यं हृततृष्णा दयालुना ।
प्रियप्राप्तिसुधावृष्ट्या दिष्ट्याद्य विधिना कृता ॥७३॥
निर्जने ऽपि निरालोके स्थितया पथि साम्प्रतम् ।
दैवं भाग्योदयेनापि प्राप्तं ज्योतिर्मया परम् ॥७४॥
मृत्युशय्यां समाश्रित्य जाताहं निद्रिता भृशम् ।
न जाने केन पुण्येन पुनर्दैवेन बोधिता ॥७५॥
जीयात्सार्थपतिर्भूयात्तथा लाभान्वितस्सदा ।
विक्रयार्थमिहानीतो दासो ऽयं येन रूपवान् ॥७६॥
का क्षतिश्चेन्मया दासो विक्रीतो बहुभिर्धनैः ।
वित्तं तद्धनिनां प्रोक्तं यत्स्वात्मार्थं प्रयुज्यते ॥७७॥
रक्षन्ति सततं रागहीना वित्तादिकं परम् ।
शरीरं द्रविणं सर्वं प्रियार्थं भुवि रागिणाम् ॥७८॥
धिक्तांल्लोभान्धधिषणान्निन्द्याञ्जगति मानवान् ।
धनमेव प्रियं येषां न सुहृत्प्रीतिभाजनम् ॥७९॥

एवं विस्मयमापन्ना हर्षोत्फुल्लविलोचना ।
अमन्यत परं सौख्यं तदा सा नृपकन्यका ॥ ८० ॥
प्रीत्यैव तन्मुखाम्भोजं पश्यन्मुहुरुपागमत् ।
मूर्छां तत्सङ्गमाह्लादलब्धसंज्ञाभवत्क्वचित् ॥ ८१ ॥
यथाविन्दत सा बाला तद्वियोगातुरा परम् ।
सततं चिन्तयोपेता क्षणमेकं युगोपमम् ॥ ८२ ॥
तथा संप्राप्य दयितं कान्तं कमललोचनम् ।
निमेषमिव हर्षेण वर्षं भूपसुता तदा ॥ ८३ ॥
विश्वं मायामयैर्भावैर्मोहयन्यो विभात्यजः ।
तस्मै नवनवाश्चर्यनिधये विधये नमः ॥ ८४ ॥

इति यवनभाषापारङ्गमपण्डितश्रीवरविरचिते
कथाकौतुके एकादशं कौतुकम् ॥

॥ ११ ॥

नोदेति रागिणां रागो दर्शनेनैव केवलम् ।
किं त्वयं जायते पुंसां श्रवणेनैव कुत्रचित् ॥ १ ॥
श्रुतिरन्ध्रेण सद्रूपकथा यदि समागता ।
मनःस्वास्थ्यं तनुर्बलं तदैवोत्कण्ठया हरेत् ॥ २ ॥
न ह्यन्यत्कर्म जानाति श्रवणं श्रवणं विना ।
श्रुत्वैव शुभवृत्तान्तं हृदयोद्वेगकारकम् ॥ ३ ॥
समयेऽस्मिन्नभूदेका कन्या देयाख्यवंशजा ।
सुकुमारानवद्याङ्गी देशे तस्मिन्सुविश्रुता ॥ ४ ॥

82b परा. 84d °विधये.

तन्वी पूर्णेन्दुनयना नवयौवनशालिनी ।
मुक्तानुकारदशना पक्वबिम्बाधरा तथा ॥५॥
मध्ये क्षामा स्तनानम्रा सन्त्रस्तहरिणीक्षणा ।
श्रोणीभारालसगतिर्निम्ननाभिर्मनोहरा ॥६॥
आसीच्छीलगुणौदार्ययुता परमसुन्दरी ।
कामं कामपताकेव भाविनी भुवि भामिनी ॥७॥
नित्यं सौधस्थिता बाला सवयोभिस्समन्विता ।
नापश्यदात्मनस्तुल्यं कंचिद्रूपादिभिर्गुणैः ॥८॥
समाकर्ण्याथ तद्वृत्तं जनोद्गीतं समन्ततः ।
सापि तं द्रष्टुकामाभूदुत्कण्ठाकुलिताशया ॥९॥
स्थानेऽद्भुतं श्रुतं किंचित्स्तुतं सद्भिर्मुहुर्मुहुः ।
तदेव सहसा द्रष्टुमुत्कण्ठयति मानसम् ॥१०॥
भूषयित्वा तदात्मानं भूषणैः प्रमदोत्तमा ।
परमर्द्धियुता मेम्नमाययौ तं निरीक्षितुम् ॥११॥
सर्वे ग्रहीतुकामास्तामासन्मेसरवासिनः ।
नित्यं तद्रूपलावण्यसमावर्जितमानसाः ॥१२॥
सहस्रमेकमुष्ट्राणां तथाश्वतरदन्तिनाम् ।
प्रवालमणिमुक्ताभिः कश्चनेनापि पूरितम् ॥१३॥
प्राप्ता तत्र समादाय नृपेणाप्रतिमं भुवि ।
योसोभनामधेयं तं क्रीतुकामापि साभवत् ॥१४॥
नराणामथ नारीणां तदागमनकारणात् ।
सर्वत्र नगरे जातः पुनः कोलाहलो महान् ॥१५॥

पप्रच्छागत्य तद्वार्त्तां लोकौघं वरवर्णिनी ।
क्रीयते स वणिग्दासः कुतोऽयमिति कथ्यताम् ॥१६॥
सम्प्राप्तेहाधुना हित्वा सर्वं बन्धुजनादिकम् ।
श्रिया परमया युक्ता तद्रूपोत्कण्ठिताप्यहम् ॥१७॥
यावत्तं द्रष्टुकामाभूदबला समुपागता ।
यथा तेन जनेनासौ सोऽयमित्येव दर्शितः ॥१८॥
अथ तं प्रथमं वीक्ष्य कान्तं कमललोचनम् ।
अनन्यसदृशं लोके रूपेणासीत्सुविस्मिता ॥१९॥
मूर्च्छितेवापतद्भूमौ तमपूर्वं विलोक्य सा ।
लब्धसंज्ञाथ शनकैः प्रोवाच मधुराक्षरम् ॥२०॥
जाने जन्मसहस्राणि विधाय विधिवत्तपः ।
विधिना निर्मितो नूनं जयन्तो नामविश्रुतः ॥२१॥
विक्रमेणास्य तनयः कथं दासत्वमाप्नुयात् ॥२२॥
यद्यन्यदेवसम्भूतो भवान्देवसुतः कथम् ।
सर्वसौख्ययुतं भूमौ नाकं हित्वावतिष्ठते ॥२३॥
यदि गन्धर्वतनयः सोऽपि गेयप्रियस्सदा ।
गौरवेण वचोऽप्येवं वदनाच्छ्रूयते न ते ॥२४॥
मन्ये मनीषया हित्वा विधात्रा तत्त्वपञ्चकम् ।
शरीरं तद्गुणैनैव रचितं केवलेन ते ॥२५॥
अथवा केन तपसा समाराध्य महेश्वरम् ।
त्वयाप्तमुत्तमं रूपं येनेदं मोहितं जगत् ॥२६॥

25b विधाता

अये कस्यापि सद्वंशसमुत्पन्नः श्रियान्वितः ।
सुवृत्तस्सुगुणानन्दो मुक्तामणिरिवोत्तमः ॥ २७ ॥
इति तस्या वचः श्रुत्वा प्रत्युवाच महामतिः ।
योगीव योगदृष्ट्या तां ज्ञातार्थो बोधयन्निव ॥ २८ ॥
नास्मि देवो न गन्धर्वो नासुरो न च पन्नगः ।
पञ्चतत्त्वात्मकं विद्धि शरीरं मामकं शुभे ॥ २९ ॥
नैतच्चित्रं विधेर्लोके वस्तुरत्नान्यनेकशः ।
अत्यद्भुतानि सर्वत्र सन्ति किंचिन्न तेष्वहम् ॥ ३० ॥
सैव बुद्धिमतां बुद्धिर्निश्श्रेयसकरी यया ।
ध्यायन्ति सततं शम्भुमनन्तं विश्वरूपिणम् ॥ ३१ ॥
यदिदं दृश्यते सर्वं नानाकौतुकसंयुतम् ।
तद्वेद्धि भवादर्शे प्रतिबिम्बमिव स्थितम् ॥ ३२ ॥
यथा किंचित्समालोक्य दर्पणे प्रतिबिम्बितम् ।
मनो धावति तत्रैव कर्तुं तन्निश्चयं मुहुः ॥ ३३ ॥
तथैव सकलं सुभ्रु जगत्स्थावरजङ्गमम् ।
दृष्ट्वा मायामयं शम्भुं ध्यायन्त्येकं मनीषिणः ॥ ३४ ॥
मानसं चेद्वरारोहे रूपदर्शनलालसम् ।
पश्यैकं शरणं मत्तं हृदि देवं मनोरमम् ॥ ३५ ॥
दृष्ट्वैव मामकं रूपं विनश्यत्किं सुखं तव ।
स्थिरं सर्वगतं तस्मात्सुभ्रु शम्भोर्विलोकय ॥ ३६ ॥
इति तद्वचनं श्रुत्वा गतमोहेव साभवत् ।

29a नास्मिन्देवो. 31d विश्वरूपिणा.

तद्द्रणात्तत्पदाम्भोजं प्रणनाम मुहुर्मुहुः ॥ ३७ ॥
ततस्सा गजरत्नानि तानि तां सम्पदं तथा ।
विहायादाय काषायपट्टमेकं सुमध्यमा ॥ ३८ ॥
भस्मभूषितसर्वाङ्गा बन्धुस्नेहविवर्जिता ।
प्रव्राजिनीव तपसे जगाम गहनं वनम् ॥ ३९ ॥
कृच्छ्रातिकृच्छ्रपराकव्रतधूतमनोऽमला ।
सर्वतीर्थावगाहेन शुद्धदेहाभवत्तदा ॥ ४० ॥
तथा नियमसंयुक्ता साभवद्धरवर्णिनी ।
यथा विस्मयमापन्नाः परं सर्वे तपोधनाः ॥ ४१ ॥
बोधयन्तस्स्वमात्मानं श्रुत्वा तद्भुतमुत्तमम् ।
स्तुवन्तस्तां वरारोहां तदासन्मुनिपुङ्गवाः ॥ ४२ ॥
समासाद्य परं धैर्यं शिक्षयास्या मृगीदृशः ।
धीरा नैवेदृशं कर्तुं कर्म शक्ताः कदाचन ॥ ४३ ॥
सा चकार तपो येन जहारेन्द्रबलं महत् ।
न तत्किंचिद्भवेच्छक्तो वक्तुं वर्षशतैरपि ॥ ४४ ॥
एवं हि रागिणां रागः कदाचित्सुकृतायते ।
स एव मूढमनसां कदाचिद्दुष्कृतायते ॥ ४५ ॥
अथ तैमोसतनयाभाग्यजालं सुविस्तृतम् ।
तदा दीर्घगुणं जातं दैवाद्धससुखाश्रयम् ॥ ४६ ॥
जगच्छासनपट्टं तन्नाममुद्राङ्कितं परम् ।
तदेव शोभितं सम्यग्बभूवेदं समन्ततः ॥ ४७ ॥

40a °पाराक°. 43a मानसाय.

अधिगम्यैव तं कान्तं परप्रेमनिधिं तदा ।
रमणी साथ संसारचिन्ताविरहिताभवत् ॥४८॥
गणयित्वाथ हर्षेण तदा वर्षदिनानि च ।
सज्जीकृत्यांशुकान्याशु तावन्त्येव मनस्विनी ॥४९॥
नित्यं नवनवं वासो ग्रथयन्मोचयन्नपि ।
अहान्यगमयत्तस्य प्रीत्या परमया तदा ॥५०॥
तथैवाशनपानादिपरिचर्यापरायणा ।
तदामन्यत सा बाला निमेषमिव वासरम् ॥५१॥
क्षणं सौधे स्थिता नूनं दयितेन क्षणं समम् ।
बहिरन्तः क्षणं मेने सुखं सा परमं तदा ॥५२॥
तत्स्नेहान्धमतिस्सैव धृत्वा वक्षःस्थले मुदा ।
अवोचद्वसनं तेन प्रतिबद्धविमोचितम् ॥५३॥
अयि वासो मया रम्यं किं नाप्तं तावकं वपुः ।
तथा सर्वाङ्गमालिङ्ग्य स्थीयते स्वं यथा त्वया ॥५४॥
तथा तत्प्रेमलुब्धाभूत्सततं सा वराङ्गना ।
यथा नैच्छत्क्षणं स्थातुं तं विना रमणं क्वचित् ॥५५॥
मुञ्चतीदं वपुश्छाया निशीथे तमसान्विते ।
तल्लीना तस्य सा नित्यमनुगाभूदहर्निशम् ॥५६॥
बद्धं यन्मृगशावाद्या सुदृढं प्रेमबन्धनम् ।
तेन साकं न तद्वक्तुं शक्तो लोकोऽस्ति कश्चन ॥५७॥
एकदानीय तं बुद्ध्या निशान्तं लोकसुन्दरम् ।
अपृच्छज्जन्मवृत्तान्तं सा तदाभाषणोत्सुका ॥५८॥

स तु तां प्रत्युवाचेदं वचः प्रहसिताननः ।
जन्मवृत्तिं न तां नूनं पितरौ नैव वेदम्यहम् ॥५९॥
किं तु जानाम्यहं कूपचरितं परमाद्भुतम् ।
निष्प्रकाशे निराहारस्तस्मिन्नासं दिनत्रयम् ॥६०॥
चतुर्थे ऽहन्युद्धृतस्तस्माद्वणिजा पुण्यकर्मणा ।
तेनाहं तत्प्रसादेन प्राप्तो ऽस्मि पदमुत्तमम् ॥६१॥
तन्मुखादथ श्रुत्वा तद्वचनं कर्कशं भृशम् ।
पुलकाङ्कितसर्वाङ्गा समभूत्प्रमदोत्तमा ॥६२॥
वेपमानापतद्भूमौ क्षणात्सा वरवर्णिनी ।
अधिगत्य शनैः संज्ञां शुशोच बहुशो ऽबला ॥६३॥
विलोक्य तां तथाभूतां पुनश्चिन्तान्वितां तदा ।
स्नेहान्धहृदया धात्री प्रोवाच करुणं वचः ॥६४॥
अयि किं मानसं सुभ्रु वियोगविधुरं तव ।
चिन्ताद्य काभवच्चित्ते कामस्ते फलितो ऽधुना ॥६५॥
स्वयं सुन्दरि ते पूर्वं शुष्कपत्त्रोपमं वपुः ।
आसीद्वियोगवातेन भ्रमितं सर्वतोदिशम् ॥६६॥
निपतत्सम्मुखं क्वापि तथैवाधोमुखं क्वचित् ।
तत्कथंचित्स्थितं दैवात्पुनः प्राप्तं दशान्तताम् ॥६७॥
किमेतदिति तद्वाक्यं समाकर्ण्य मनस्विनी ।
प्रत्युवाच शनैर्बाला निश्श्वसन्ती मुहुर्मुहुः ॥६८॥
तत्कथं वक्ष्यते मातर्मयाप्तं दुःखमुत्तमम् ।
धन्या धारयितुं भूमिर्मामेकाहमथापि तत् ॥६९॥

धूलिवत्पतिता भूमौ चिरमासमसंशयम् ।
अकस्मात्साम्प्रतं चिन्ताचक्रवातेन घूर्णिता ॥७०॥
कथितं कूपवृत्तान्तं वल्लभेनामुनाधुना ।
समाकर्ण्यापि मे काचिद्धृतिर्नैवावशिष्यते ॥७१॥
सन्तं सुहृन्मनोमित्रमानसं वेत्ति नापरः ।
यात्यस्मिन्सुखिते सौख्यं दुःखं दुःखान्विते ऽपि तत् ॥७२॥
सरन्ध्रं यन्मनो मित्रविप्रयोगेन रागिणः ।
सत्यं पश्यति तेनासौ गवाक्षेणेव तं मुहुः ॥७३॥
सत्यं तत्परमं प्रेम ख्यातं मज्ञोनलैलयोः ।
न शक्यते तथा वक्तुं यथा प्रकृतिजीवयोः ॥७४॥
नखरः स्वभुजे यावत्सिरार्थं निहितस्तया ।
मज्ञोनस्य करात्तावद्बहु सुस्राव शोणितम् ॥७५॥
प्रकृतिः पीडिता चेत्स्याज्जीवो ऽप्येवं तथातुरः ।
स यदा चिन्तयोद्भूतः तनुः कार्श्यमुपैत्यलम् ॥७६॥
यद्रागाद्बद्धहृदयो नरो वायुसमीरितम् ।
तद्वस्त्रापतितं रेणुं सहते नैव जातु चित् ॥७७॥
अनुभूतां पुरानेन कूपावस्थां कथान्तरे ।
कथितामधुना मातः श्रुत्वा दुःखाकुलास्म्यतः ॥७८॥
इति श्रुत्वा वचस्तस्या धात्री प्रोवाच सादरम् ।
सत्यं चिन्तान्वितं चित्तं नित्यं मा कुरु सुन्दरि ॥७९॥
सदये हृदये धैर्यं धृत्वा हित्वाथ तां पुनः ।

76b यथातुरः.

चिन्तां तद्वचनाद्बाला जातहर्षाभवत्तदा ॥८०॥
तद्रागेणाभवद्भूपसुतानन्दयुता क्वचित् ।
क्वचिद्दुःखान्विता किंचित्स साधुर्न विवेद तत् ॥८१॥
इति यवनभाषापारङ्गमपण्डितश्रीवरविरचिते कथाकौतुके
द्वादशकं कौतुकम् ॥

॥१२॥

स हि धन्यो नृलोकेऽस्मिन्नात्मारामः परिभ्रमन् ।
हितार्थहृदयं योषिच्चिन्तासक्तिविवर्जितः ॥१॥
विज्ञाय मानसं तस्य प्रेमहीनं तदाबला ।
स्वात्मनोऽपि तथा स्नेहयुतं विस्मयमाप सा ॥२॥
न मया भाषते किंचिन्मुनिवन्मौनमास्थितः ।
निःस्पृहोऽयं नृपसुता किं करोमीत्यचिन्तयत् ॥३॥
केनोपायेन वशतामानयिष्याम्यमुं तदा ।
यथैवायं भवेन्नित्यं मम प्रणयकारकः ॥४॥
अद्यैनं दयितं दासं कोशाध्यक्षं करोमि चेत् ।
जायन्तेऽस्य ततः सर्वे वैरिणः किं सुखं मम ॥५॥
किं वा संयोजयाम्येनं कर्मण्यन्यत्र कुत्रचित् ।
तदास्य दुर्लभं मन्ये तदासक्तस्य दर्शनम् ॥६॥
किं तत्स्वल्पं भवेत्कार्यं यस्मिन्संस्थापितस्सदा ।
प्रयात्येव प्रभातेऽसौ सायं प्रत्यागमिष्यति ॥७॥
पश्याम्येनं यथा नित्यं ममैव निकटस्थितः ।
यथायमधुना वृद्धिस्तादृशी का विधीयताम् ॥८॥

बकुशोऽथ विमृश्यैवं भूपालतनया शुभम् ।
ज्ञात्वा तदेव बुद्ध्या तं पशुपालं व्यधात्तदा ॥ ९॥
स्थितेऽप्यत्यद्भुते स्नेहे तत्कर्मविनियोजनम् ।
तस्य सर्वे तिरस्कारममन्यन्त पुरौकसः ॥ १०॥
योग्यं तस्याभवत्कर्म तदेव हि करोत्यलम् ।
पशुभावसमापन्नरक्षां देवांशसंभवः ॥ ११ ॥
सर्वदेवशरीरेभ्यः प्रगृह्यांशं पृथक्पृथक् ।
विहितो वेधसा सोऽयं पशुपालोऽभवत्ततः ॥ १२॥
समादायाजमेषादीन्पशूनेवं तदाज्ञया ।
निर्दावदहनं दावं पालयन्व्यचरत्तदा ॥ १३॥
प्रातर्गच्छन् गृहीत्वा तान्सायं प्रत्यानयन्नसौ ।
तदग्रे स्वं वपू रम्यं त्रिसंध्यं दर्शयन्मुदा ॥ १४॥
तत्कर्मनिरतो भूत्वा सवयोभिः समन्वितः ।
दिनान्यगमयत्तैस्तैर्विहारैर्वनसम्भवैः ॥ १५॥
मेषराश्यन्तरस्थोऽसौ बालो बलवतां वरः ।
प्रतापोदयदुर्दर्शो रेजे तेजोनिधिर्यथा ॥ १६॥
नित्यं तद्दर्शनालापसमुत्कण्ठितमानसा ।
सा यथाभूत्तथैवासौ विरक्तहृदयः परम् ॥ १७॥
यथा यथा वीक्षमाणा तदीयाननपङ्कजम् ।
प्रीत्या तथा तथैवायं लज्जानप्रमुखोऽभवत् ॥ १८॥
किंचित्कुतूहलेनेयं प्रष्टुकामापि कामिनी ।

16b बलो.

यावत्तावन्महाबुद्धिः सोऽपि मौनं समाश्रितः ॥१९॥
यावदुक्तो नितम्बिन्या त्वयाग्रे स्थीयतामिति ।
तावद्व्ययेन धीरोऽसौ ययौ पश्चाच्छनैश्शनैः ॥२०॥
यथा तत्प्रेमविवशा सततं सा सुलोचना ।
तथैव हि महाबुद्धिर्विरक्तोऽसौ सुरूपवान् ॥२१॥
ज्ञात्वा तदाशयं रागविहीनं तनुमध्यमा ।
चक्रन्द चिन्तयोद्भूता कुररीव दिवानिशम् ॥२२॥
नावशिष्टं तु तत्किंचिद्दुःखं बालमृगीदृशा ।
तया नैवानुभूतं यत्तद्वियोगोत्थितं तदा ॥२३॥
ततस्सा विमनस्केव जहौ देहप्रसाधनम् ।
नाकरोत्केशरचनां नाञ्जनं नयनेऽञ्जयत् ॥२४॥
नापि केलिकलां कांचित्सखीभिः सह साकरोत् ।
नित्यं सुमध्यमानल्पविकल्पनिरताभवत् ॥२५॥
इति चिन्तातुरां दृष्ट्वा पुनस्तां हरिणेक्षणाम् ।
स्नेहार्द्रहृदया धात्री प्रोवाच मधुराक्षरम् ॥२६॥
किं तवाद्य विशालाक्षि मनश्चिन्तान्वितं पुनः ।
कामं कर्तुं प्रियं प्राप्य न शोकं कर्तुमर्हसि ॥२७॥
इति तद्वचनं श्रुत्वा भूपालतनयावदत् ।
न तदाप्तं मया मातः सुखं यन्मनसीप्सितम् ॥२८॥
सत्यं वेत्ति जनोऽयं मां प्राप्तकामार्थहर्षिताम् ।
न तु तन्मानसं ज्ञातुं कः शक्तो वा पराशयम् ॥२९॥

24b जह्ना. 27a तुवाच.

दुर्लभो हि नृलोकेऽस्मिन्नरो नरशिरोमणिः ।
गूढदुःखातुरं सम्यग्वेत्ति यः परमानसम् ॥३०॥
न जाने कर्मणा केन विपरीतेन मे विधिः ।
नित्यं वैरपरो जातं यत्राद्य भग्नं मन्मनः ॥३१॥
कामे नाप्ते वरं तावच्चिन्तासीत्केवलैव मे ।
अधुनाधिगते सैव जाता शतगुणाशये ॥३२॥
न हि शक्तास्मि तां वक्तुं व्यथां कान्तावियोगजाम् ।
प्रश्नैरेवंविधैर्मातः पीडये मां मुहुर्मुहुः ॥३३॥
इत्थं निशम्य तद्वाक्यं तथान्यत्र तयेरितम् ।
गूढार्थमपि तज्जातं प्रकटं जनसंसदि ॥३४॥
उदन्तं तं समाकर्ण्य तच्छिद्राबद्धमानसाः ।
तद्धसुर्भूपतनयां तत्रान्तःपुरयोषितः ॥३५॥
ह्रा धिग्बुद्धिमिमामस्या विपरीतां विमुच्य या ।
कान्तं स्वं भूपतिं दाससमासक्तमनोरथा ॥३६॥
क्वेयं भूपसुता शुद्धकुला लावण्यशालिनी ।
क्व चायं भृतकोऽज्ञातवंशः परवशस्सदा ॥३७॥
अविचार्य कृतं कार्यमनार्यं मुग्धयानया ।
व्यधात्कोऽपि न वामाक्षीप्रत्ययं येन साम्प्रतम् ॥३८॥
इति श्रुत्वापवादं तं सपत्नीभिस्समीरितम् ।
दासनृपानभिज्ञाभिश्चिन्तामाप दुरत्ययाम् ॥३९॥
पुरा लोकापवादेन दुर्निवारेण दूषितः ।

31d यत्र जातं भग्नोद्य मंमनः. 37c चाहं. 38c वामाक्षि°.

स हि रामो गुणारामः स रामो धर्मतत्परः ॥ ४० ॥
क्वाहं वराका कृपणा निन्द्या जगति नित्यशः ।
किं तु शक्तास्मि तामद्य बुद्ध्या नाशयितुं तथा ॥ ४१ ॥
विधिरेष विधातव्यो निशान्ते ऽवरया मया ।
पूर्वमाहूयन्ते सर्वा निशान्तवरयोषितः ॥ ४२ ॥
तदग्रे ऽभ्यवहारार्थं ततः किंचित्फलादिकम् ।
निधीयते ऽथवानेकरसं भोजनमुत्तमम् ॥ ४३ ॥
ततस्तत्परिचर्यायै भृतको ऽयं विसृज्यते ।
दृष्टे ऽस्मिन्योषितस्सर्वा यान्ति मोहवशं तथा ॥ ४४ ॥
उपायेनामुना नूनं विहितेन हि तेन च ।
अयशो नाशमायाति भृत्योत्पन्नं ममाखिलम् ॥ ४५ ॥
इति कृत्वा मतिं भूपतनया तत्तथाकरोत् ।
पूर्वमुर्वारुकाण्याशु तदग्रे निदधे स्वयम् ॥ ४६ ॥
शकलानि शलाकाभिर्यावत्तानि मृगीदृशः ।
कुर्वन्त्यस्स्म तया तावत्सेवार्थं प्रेषितस्ततः ॥ ४७ ॥
सशरीरमिवानङ्गं तं विलोक्यागतं पुरः ।
मोहिताश्चिच्छिदुस्ताभिः स्वहस्ताविव योषितः ॥ ४८ ॥
तद्गणाङ्गानि मोहेन पुरा ज्ञातानि यान्यलम् ।
अद्य तान्येव हस्तस्थलेखालक्ष्येण लक्ष्यन्ते ॥ ४९ ॥
एवं विस्मयमापन्नास्तद्रूपाकृष्टमानसाः ।
विजहुः प्रेमसम्भूतमयशो ऽस्यास्तदङ्गनाः ॥ ५० ॥

42c पूर्वमाहूयते. 48c °श्चिच्छदु°. 49d लक्ष्यते.

दर्शं दर्शं यथा नित्यं साभवत्प्रेमविह्वला ।
क्षणमेकं विलोक्यैनं तथैवैतास्सुलोचनाः ॥५१॥
विज्ञायापयशो बुद्ध्या पुनर्भूपालनन्दिनी ।
तदासक्ताशया बाला समभूत्सा यथा पुरा ॥५२॥
क्वचित्सद्मनि सौधेऽपि सभायां विजने क्वचित् ।
स तदाहूयमानोऽपि नोपयातस्तदन्तिकम् ॥५३॥
ज्ञात्वा तदाशयं प्रेमविहीनं तनुमध्यमा ।
बहुशः चिन्तयामास वशीकर्तुममुं पुनः ॥५४॥
अथैकं मन्दिरं गूढं रचयामास साद्भुतम् ।
सुचारु कारुभिः कर्म विश्वकर्मानुकारिभिः ॥५५॥
तदाज्ञया विमुच्यान्यनानालेख्यं मनोरमम् ।
यस्मिंश्चित्रद्वयं चित्रं कृतं चित्रकरैः परम् ॥५६॥
विरक्तोऽस्याः स योसोभनामधेयोऽतिरूपवान् ।
सा च भूपसुता चाटुपरा तद्विरहातुरा ॥५७॥
कृत्वा वासगृहं सज्जं तूर्णं तच्चित्रसंयुतम् ।
उपायेनाथ तं तत्र विससर्ज नृपात्मजा ॥५८॥
किं वा वीक्ष्य तदालेख्यं मनोऽस्यायाति मार्दवम् ।
वियोगेनागतामेतां गतिं मां प्रति कातराम् ॥५९॥
इत्याशया विसृज्यैनं पूर्वं तत्र सुमध्यमा ।
स्वयमप्यागता पश्चाच्छनैः सा प्रमदोत्तमा ॥६०॥
अविज्ञाताशयं तस्याः सत्यधर्मपरायणम् ।

55a यथैकं.

प्रविष्टं मन्दिरे तस्मिंस्तमेवानुविवेश सा ॥६१॥
चित्रं दृष्ट्वाद्भुतं तेन स यावद्व्रीडितोऽभवत् ।
विवृत्तवदनस्तावद्वचो भूपसुतावदत् ॥६२॥
अयि जीवेश जीवाशा जीवलोके ममापरा ।
काचिन्नो वास्ति कान्तं त्वां विना राजीवलोचनम् ॥६३॥
अयि प्रणयिनां नित्यं परोपकृतितत्पराः ।
वृथा मनोरथं कर्तुं कुशला न भवादृशाः ॥६४॥
द्वयं रूपान्विते योग्यं लावण्यमपि मार्दवम् ।
तच्युतेन गृहीतं किं त्वयैकं ह्यपक्रमम् ॥६५॥
अयि त्वद्विरहाक्रान्तां त्वत्प्राप्याशाश्रयां परम् ।
घातयित्वाबलां लोके जायतेऽपयशस्तव ॥६६॥
जातं त्वच्चिन्तया चित्तं शीतलं सर्वतो मम ।
जाने न हि कथं श्वासा दाहिनश्चास्रबिन्दवः ॥६७॥
अयि त्वद्विरहेणैव शतच्छिद्रान्वितं मनः ।
वद सन्दर्शयिष्यामि विदार्याद्य निजोदरम् ॥६८॥
अयि नाथानुभूतं यद्दुःखं त्वद्विप्रयोगजम् ।
न तदद्य मया शक्यं वक्तुं वर्षशतैरपि ॥६९॥
किं तु त्वत्प्रीतये रम्यं वेश्मेदं विहितं मया ।
ईदृक्चित्रान्वितं सम्यग्विलोकयितुमर्हसि ॥७०॥
अभिधायेति वाक्यं तत्प्रेमनिर्भरमानसम् ।
समायाता निरोद्धुं तं बलेनैव बलान्वितम् ॥७१॥

---

64 b °तत्पर:.   66a त्वयि तद्विरहा°.

सोऽपि तद्धृदयं ज्ञात्वा निकामं कामपीडितम् ।
तामनादृत्य वेगेन विनिर्यातो बहिस्ततः ॥७२॥
भयेनैवापयान्तं तमनुद्रुत्याथ भामिनी ।
पश्चाज्जग्राह पाणिना तूर्णं चीनांशुकाञ्चले ॥७३॥
बलेनाकृष्यमाणं तद्वसनं तस्य सा शुभम् ।
शिरोधरायाः प्राग्भागे व्यदरत्तु नृपात्मजा ॥७४॥
अपयान्तं तथैवामुं जवेन सा नराधिपम् ।
बहुशोऽतर्जयत्क्रुद्धा पश्चाद्भूपालनन्दिनी ॥७५॥
याहि याहि कुतो मूढ गम्यते कर्म तावकम् ।
कथयित्वा नृपाग्रे त्वां हनिष्याम्येवमप्रियम् ॥७६॥
तर्जयन्निति सात्तेजमेस्वपार्श्वमुपागमत् ।
गलिताश्रुकणा मन्युलुलितालकसन्ततिः ॥७७॥
सोऽपि तां दयितां वीक्ष्य तथारूपामुपागताम् ।
विस्मयाविष्टहृदयः सान्त्वयन्निदमब्रवीत् ॥७८॥
अयि सुन्दरि त्वद्वैरियोग्येयं दुर्दशा कथम् ।
गृहीतेवं त्वयानन्तरोषाकुलमनीषया ॥७९॥
मर्त्यलोकेन केनापि खण्डितं चेन्मनस्तव ।
तदेव वद सुश्रोणि प्रसन्नं क्रियते मया ॥८०॥
मन्युना वापरस्यापि कस्यचिद्गुत भामिनि ।
विमनस्कासि तं हन्तुं शक्तोऽस्मि तव साम्प्रतम् ॥८१॥
इत्थं निशम्य तद्वाक्यं प्रत्याहैनं नृपात्मजा ।

74a बालेना°. 75b om. सा; नराधिनम्.

क्रोधरक्तेक्षणा मुञ्चत्कदुष्णोच्छ्वाससन्ततिम् ॥ ८२ ॥
त्वदीयेन व्यलीकेन न दूये पार्थिवोत्तम ।
को वा कोपयितुं शक्तो मनो मे प्राकृतो जनः ॥ ८३ ॥
किं तु कर्म विधायैकं दूये मुग्धधिया स्वयम् ।
अयोग्यमेव वक्तुं तच्छ्रुत्वा भूपाल क्षम्यताम् ॥ ८४ ॥
योऽयं दासो मया क्रीतो नरेन्द्र बकुभिर्धनैः ।
किं त्वभीकोऽभिकस्सोऽयं जातो मां प्रति पार्थिव ॥ ८५ ॥
जातास्मि चिन्तया यावद्भूपालालेख्यपुत्रिका ।
सोऽपि तावन्निरोद्धुं मां बलेन समुपागतः ॥ ८६ ॥
तमागतं समालोक्य भृशं कामवशं गतम् ।
भयेनोद्भ्रान्तहृदया संजाताहं तदा नृप ॥ ८७ ॥
उपाये नेक्षितेऽन्यस्मिन्विना युद्धं नखानखि ।
विधाय तत्स्वधर्मोऽयं कथंचिद्रक्षितो मया ॥ ८८ ॥
इति राज्ञीवचः श्रुत्वा स भूपोऽमर्षपूरितः ।
तूर्णमानीय तं दासं क्रुधा कारागृहे न्यधात् ॥ ८९ ॥
सह बन्दीकृतैस्तत्र बकुभिः कृतसंस्थितिः ।
तदामन्यत तद्दुःखं न किंचिद्धर्मतत्परः ॥ ९० ॥
किं तु तत्स्नेहपाशेन सैव भूपालनन्दिनी ।
बन्धिता चिन्तयोद्भूता कारावेश्मगताभवत् ॥ ९१ ॥
एवं निवसतस्तस्य तत्र कारागृहे पुनः ।
व्यतीयुर्निर्विकारस्य दश वर्षाणि हेलया ॥ ९२ ॥
आस्तामासवशालीयस्तत्रैव च पुरोगवः ।

उभौ बन्दीकृतौ राज्ञा पूर्वं क्रोधान्धचेतसा ॥ ९३ ॥
एकोऽपश्यत्तयोस्स्वप्ने स्वमात्मानं नृपान्तिके ।
शीधुमात्रकरं सम्यग्रचितापानविभ्रमम् ॥ ९४ ॥
तथान्नभाजनं स्वादुव्यञ्जनं मस्तके धृतम् ।
निपतद्ध्वाङ्क्षवृन्देन भक्षितं दृष्टवान्परः ॥ ९५ ॥
किमेतदिति सम्भ्रान्तहृदयौ तौ मुहुर्मुहुः ।
पप्रच्छतुर्जनान्सर्वान्कारागृहगतानपि ॥ ९६ ॥
कर्तुं तन्निश्चयं कश्चिन्नाभूच्छक्तस्तदापरः ।
किं तु योसोभनामासौ प्रोवाचार्थविचक्षणः ॥ ९७ ॥
स्वप्ने येनैव भूभर्तुः पानलीला कृताधुना ।
स्वल्पैरहोभिर्भगवच्छालीयत्वं समश्नुते ॥ ९८ ॥
येनान्नं भक्षितं मूर्ध्नि वायसैः प्रेक्षितं परम् ।
स याति पञ्चतां शीघ्रं शिलासारेण सांप्रतम् ॥ ९९ ॥
यथैव स महाबुद्धिः कृतवान्निश्चयं पुनः ।
तथैवाधिगतं ताभ्यां फलं स्वप्नसमुद्भवम् ॥ १०० ॥
एकोऽभून्मेस्रभूभर्तुः पानलीलासु दीक्षितः ।
अपरोऽपि तदा राज्ञा शिलासारेण मारितः ॥ १०१ ॥
एकदा मेस्रभूपालः स्वप्नेऽपश्यत्स्वयं महान् ।
सुपुष्टं महिषीवृन्दं भक्षयन्तं परं कृशम् ॥ १०२ ॥
प्रबुद्धोऽथ समानीय सचिवान्स महीपतिः ।
किमेतदिति पप्रच्छ तमूचुस्ते न किंचन ॥ १०३ ॥
अब्रवीत्सोऽथ भगवच्छालीयस्तत्र भूपतिम् ।

दत्वा जानुद्वयं भूमौ प्राञ्जलिर्नतकन्धरः ॥१०४॥
योऽयं दासो महाबुद्धिर्जोलिखाजेजमेस्वयोः ।
कारागृहगतो राजन्स हि स्वप्नार्थपारगः ॥१०५॥
पूर्वं मयापि भूपाल बन्दीवेश्मनि वीक्षितः ।
स्वप्नस्तेन यदेवोक्तं तदाप्तं फलमद्भुतम् ॥१०६॥
इति श्रुत्वा स भूपालः समानीयाशु तं ततः ।
स्वप्नार्थं परिपप्रच्छ समुत्कण्ठितमानसः ॥१०७॥
शृणुष्वावहितो राजन्कथयामि समासतः ।
स्वप्नार्थं सुखदं लोके यथाबुद्धि तवाज्ञया ॥१०८॥
अद्यप्रभृति लोकेन्द्र सप्त वर्षाणि मेदिनी ।
मासांश्च तावतस्सर्वसस्यपूर्णा भविष्यति ॥१०९॥
पश्चाद्दुर्भिक्षजा पीडा बाधते सकलं जगत् ।
कार्यं लोकहितार्थाय सर्वान्नग्रहणं विभो ॥११०॥
इत्याकर्ण्य धराधीशो ज्ञात्वा सत्यपरं परम् ।
तमेव कल्पयामास सर्वान्नग्रहणे तदा ॥१११॥
अथ भूपाज्ञया सोऽपि व्यवहारविचक्षणः ।
चकार सर्वतो ह्यन्नराशीन्पर्वतसन्निभान् ॥११२॥
एवं निष्पादितं कार्यं यावत्तेन विधेर्वशात् ।
भूपतिस्सचिवश्चोभौ यातौ नामावशेषताम् ॥११३॥
ततः प्रकृतयः सर्वा अनाथास्तत्र कातराः ।
चक्रुस्तमेव योसोभनामधेयं महीपतिम् ॥११४॥

107b समानीयाशुभं.

अधिगम्याथ सद्भाग्यै राज्यं राजपराक्रमः ।
विधिवत्पालयामास प्रजा धर्मेण धर्मवित् ॥११५॥
नित्यं प्रमुदिता लोके आसंस्तस्मिन्क्षितीश्वरे ।
विना तद्विरहाक्रान्ततनुं तां नृपकन्यकाम् ॥११६॥
यन्नेत्रसाम्यभात्येव याता बालमृगा वनम् ।
अहो तद्विप्रयोगान्धदृष्टिः सैवाभवत्तदा ॥११७॥
अवश्यभाविनोऽर्थस्य कोऽन्यथा कर्तुमीश्वरः ।
बुबुधे न स तद्दुःखं तथा प्रीतोऽपि पार्थिवः ॥११८॥

इति यवनशास्त्रपारङ्गमपण्डितश्रीवरविरचिते
कथाकौतुके त्रयोदशं कौतुकम् ॥

॥ १३ ॥

एकदा शासतस्तस्य धरणीं तत्र सोदराः ।
मेस्रमर्थार्थिनः प्राप्ता भृशं दुर्भिक्षपीडिताः ॥१॥
दृष्ट्वा तान्दूरतस्सर्वान्परिज्ञाय च भूपतिः ।
पप्रच्छ विनयानम्रः के भवन्तोऽतिदुर्बलाः ॥२॥
प्रत्यूचुस्तं महात्मानं वयं सर्वे सहोदराः ।
त्यक्त्वा स्वविषयं प्राप्तास्त्वत्सकाशं क्षुधातुराः ॥३॥
इत्याकर्ण्य महीपालः पुनः पप्रच्छ तत्र तान् ।
किंनामधेयो जनको भवतां विषयोऽपि वा ॥४॥
कनानघोषं याकोभनामाख्यातः पितास्ति नः ।
योसोभाख्यसुतोत्पन्नदुःखार्तननयोऽपि सन् ॥५॥

117a °भात्येव.

अथ वृत्तं पुरा वृत्तं श्रुत्वा सर्वं महीपतिः ।
वस्त्रमेकं स्वकं दत्त्वा जनकार्थं महामनाः ॥६॥
प्रत्येकमन्नभारं च निपानं स्वर्णसंस्कृतम् ।
गुप्तं निधाय तन्मध्ये विससर्ज स तान् गृहान् ॥७॥
यथा यथा समीपत्वं प्राप्तास्ते नृपपूजिताः ।
तथा तथा पिताकस्मात्तेषामजनि हर्षितः ॥८॥
तस्याग्रतो विहायैवं सकलं वसनादिकम् ।
तच्छशंसुर्महात्मानं नृपं धर्मपरायणम् ॥९॥
यावदबन्धि वसनं तत्पित्रा स्वयमद्भुतम् ।
आविर्बभूव ज्योतिस्तत्स्पर्शेनैवास्य चक्षुषोः ॥१०॥
प्राप्तालोकः स याशोभनामधेयोऽतिशोभनः ।
पुनर्जातमिवात्मानममन्यत महामतिः ॥११॥
सम्प्राप्तेऽथ प्रकाशेऽसौ विस्मयाविष्टमानसः ।
समाहूयाब्रवीत्सर्वान्सुतान्बन्धूंश्च तत्क्षणम् ॥१२॥
अहो किं विधिमायेयं क्षणान्नानार्थदर्शिनी ।
किं वा भाग्योदयो मेऽद्य पश्यामि यदिदं पुनः ॥१३॥
योसोभाख्यसुतोत्पन्नविरहान्धीकृतं पुरा ।
नेत्रद्वन्द्वमभूत्किं वा वसनं तस्य साम्प्रतम् ॥१४॥
यत्ने कृतेऽपि नैर्मल्यमगाद्यन्नैव जातु चित् ।
अंशुकस्पर्शमात्रेण तन्मेऽद्यैव प्रकाशितम् ॥१५॥
इति तद्वचनं श्रुत्वा बान्धवास्तनयास्तथा ।

---

11 c °त्मानमन्यत.

स्तुवन्तो विधिवैचित्र्यं बभूवुर्हृष्टमानसाः ॥ १६ ॥
अथ याकोभनामासौ स्मयाविद्धः सहात्मजैः ।
स्वयं मेस्राधिपं द्रष्टुमाजगाम महामतिः ॥ १७ ॥
स मेसरं समासाद्य समासीनं च भूपतिम् ।
दृष्ट्वा हृष्टमनास्तस्थौ बद्धाञ्जलिपुटः क्षणाम् ॥ १८ ॥
ततस्स भूपतिर्दृष्ट्वा जनकं स्वं चिरायुषम् ।
भद्रासनात्समुत्थाय प्रणानाम मुहुर्मुहुः ॥ १९ ॥
दण्डवत्पतितं भूमौ सुतं सुखनिधिं पिता ।
समालिङ्ग्याशु पाणिभ्यां चुचुम्ब वदनं ततः ॥ २० ॥
एवं तद्दर्शनानन्दगताशेषपरिश्रमः ।
वृद्धोऽमन्यत लोके स्वं सद्भाग्योदयसंयुतम् ॥ २१ ॥
अथ पितृनिदेशस्थो भ्रातृभिः परिवारितः ।
पालयामास विधिवत्प्रजा धर्मेण भूपतिः ॥ २२ ॥
ततस्सा राजतनया जोलेखानामविश्रुता ।
तरुणी तद्वियोगान्धदृष्टिर्वृद्धत्वमागता ॥ २३ ॥
समुपेत्य सभाद्वारं दुःखगद्गदया गिरा ।
बाष्पाम्बुपूर्णनयना व्याजहार मिताक्षरम् ॥ २४ ॥
अहो भाग्यविहीनाहमेका जगति साम्प्रतम् ।
इमामवस्थां संप्राप्तां न मामवति यन्नृपः ॥ २५ ॥
त्वयि धर्मपरे राज्ञि प्रजानन्दकरे परम् ।
एकाहं दुःखिता चेत्स्यामयशः कस्य साम्प्रतम् ॥ २६ ॥
तद्यशो रक्ष भूपाल लोकद्वयहितावहम् ।

दीनानाथपरित्राणं धर्म एव महीक्षिताम् ॥ २७ ॥
इति तद्वचनं श्रुत्वा सभ्यास्सर्वे महीपतिम् ।
प्रोचुः प्राञ्जलयो राजन्वृणीष्वेमां सुमध्यमाम् ॥ २८ ॥
निशम्य मन्त्रिवाक्यं तद्राजा स्मितमुखोऽवदत् ।
क्वेयं वृद्धान्धनयना क्व चाहं तरुणः सुदृक् ॥ २९ ॥
सख्यं हि समयोः प्रोक्तं न हीनोत्तमयोः क्वचित् ।
विपरीतं तु यः कुर्यात्स यात्येवोपहास्यताम् ॥ ३० ॥
इत्थं वदति भूपाले तावत्सापि सुमध्यमा ।
व्याजहार वियोगेन प्राप्तास्मीमां दशां तव ॥ ३१ ॥
प्रतीतिश्चेन्न ते राजन्स्त्रीणां चञ्चलचेतसाम् ।
सत्यं तदपि मच्चित्तपरीक्षां कुरु साम्प्रतम् ॥ ३२ ॥
यदि सादिसहस्रेषु गच्छत्सु पुरतो मम ।
वृणोष्यति भवद्वाहवल्गां प्रेमान्वितं मनः ॥ ३३ ॥
इत्थं निशम्य भूपालस्सर्वं चक्रे समाहितः ।
अग्रहीत्सापि तद्वाजिवल्गामेव नृपात्मजा ॥ ३४ ॥
पप्रच्छ तां नृपो बालां ज्ञातमेतत्कथं त्वया ।
संलग्ना हृदये राजंस्त्वद्वाजिक्रमसन्ततिः ॥ ३५ ॥
ज्ञात्वा प्रेमयुतं चित्तं वित्तं तद्द्व्ययीकृतम् ।
मानयन्मानिनीं राजा व्याजहार स्मिताननः ॥ ३६ ॥
वरं वरय वामोरु सन्तुष्टं मम मानसम् ।
एतावदेव विवृतं रक्ष मां शरणागताम् ॥ ३७ ॥
बालोऽहं भवती वृद्धा न चेदेवं वराङ्गने ।

अधुनैव गृहीतुं त्वां परमोत्कण्ठितं मनः ॥ ३८ ॥
यद्येवं यौवनं याचे शम्भुं भूपाल तेऽग्रतः ।
स मे दास्यति तन्नूनमनाथगतिरीश्वरः ॥ ३९ ॥
ओमित्याकर्ण्य तद्वाक्यं सन्तुष्टा नृपनन्दिनी ।
अस्तौषीत्पश्यतां तेषां सभ्यानां परमेश्वरम् ॥ ४० ॥
नमः शिवाय शुद्धाय प्रपन्नाभयदायिने ।
अप्रमेयानुभावाय पराय परमात्मने ॥ ४१ ॥
ओम् । नमोऽनाथागतित्राणकर्त्रे सद्भयहारिणे ।
चन्द्रार्धमौलये देवदेवायोरगहारिणे ॥ ४२ ॥
दिगम्बराय नेत्रोत्थवह्निसूर्येन्दुवर्चसे ।
सम्पदां प्रभवे भक्तभयशोकहराय च ॥ ४३ ॥
नमोऽनन्तस्वरूपाय धर्माधर्मैकसाक्षिणे ।
गतिमेवंविधां प्राप्तां प्रपन्नां पाहि मां प्रभो ॥ ४४ ॥
इत्यभिष्टूय भूपालपुत्री पशुपतिं विभुम् ।
तद्ध्यानानन्दसंपूर्णचित्तवृत्तिरभूत्क्षणम् ॥ ४५ ॥
ततः प्रादुरभूद्वाणी गगनात्सिद्धिदायिनी ।
उत्तिष्ठोत्तिष्ठ सुभ्रु त्वं प्रार्थयस्वेप्सितं वरम् ॥ ४६ ॥
प्रसन्नो भगवाञ्शम्भुर्देवदेवो जगत्पतिः ।
यत्प्रार्थ्यतेऽधुना तूर्णं स ददाति महेश्वरः ॥ ४७ ॥
इति श्रुत्वा वचो दिव्यं सन्तुष्टा पार्थिवात्मजा ।
यौवनं प्रार्थयामास विषयासक्तधीः पुनः ॥ ४८ ॥
दत्तं ते यौवनं सुभ्रु शम्भुनानाथबन्धुना ।

रमणेनामुना सार्धं यथेष्टं सुखिता भव ॥ ४९ ॥
किं तु शान्ते महाकल्पे स्वमात्मानं महेश्वरः ।
उपाविशति लोकानां कर्तुं कर्मविनिश्चयम् ॥ ५० ॥
तथा सर्वाणि भूतानि तरुणानि समन्ततः ।
सम्भवन्ति त्वमेवैका वृद्धा तेषु सुमध्यमे ॥ ५१ ॥
सुखदुःखमयं ज्ञात्वा पर्यन्ते संशयं परम् ।
कर्तव्यमुचितं सुभ्रु कर्तव्यमधुना स्वयम् ॥ ५२ ॥
एवमेतद्भवेत्तावद्यौवनं मे प्रदीयताम् ।
न शक्यते पुनः सोढुं दुस्सहां विरहव्यथाम् ॥ ५३ ॥
एवं सा भूपतेः कन्या जराजीर्णापि तत्क्षणम् ।
संजाता पूर्वतारुण्यशालिनी प्रमदोत्तमा ॥ ५४ ॥
तदद्भुतं विधेः कर्म शीलधर्मं च सुभ्रुवः ।
प्रशंसन्तो महात्मानः सर्वे प्रमुदिता जनाः ॥ ५५ ॥
अथ भूमिपतिर्लब्धप्रतीतिर्हृष्टमानसः ।
प्रगृह्य पाणिना पाणिं तस्या बालमृगीदृशः ॥ ५६ ॥
सुरसद्मोपमं श्रीमत्कृतकौतुकमङ्गलम् ।
गीतवादित्रसंजुष्टं प्राविशद्राजमन्दिरम् ॥ ५७ ॥
संप्राप्य तां वरारोहां नवयौवनशालिनीम् ।
मेने कृतार्थमात्मानं सदा भूमिपतिस्तदा ॥ ५८ ॥
सापि तं रमणं श्रेष्ठं प्राप्य भूपालनन्दिनी ।
अमन्यतैकमात्मानं लोके जन्मभृतां वरम् ॥ ५९ ॥

52a सुखं°.

नित्यनूतनप्रेमार्द्रहृदयौ दम्पती भृशम् ।
चक्रतुर्विविधाः क्रीडा नानोपवनभूमिषु ॥६०॥
यथा विरहजं दुःखं न कश्चिच्छक्तिमानभूत् ।
वक्तुं संयोगसम्भूतं सुखं लोके तथा तयोः ॥६१॥
वियोगं सन्निकर्षं च द्वयं कर्तुं य ईश्वरः ।
तस्मै नवनवाश्चर्यनिधये विधये नमः ॥६२॥

इति यवनशास्त्रपारङ्गमपण्डितश्रीवरविरचिते
कथाकौतुके चतुर्दशं कौतुकम् ॥

॥१४॥

अभिधाय कथामेतां शृङ्गारादिरसाङ्किताम् ।
अधुना वक्ष्यते शान्तो लोकद्वयहितावहः ॥१॥
असारे जीवलोकेऽस्मिन्कियन्मानस बालवत् ।
विहर्तुं साभिलाषोऽसि सर्वमन्ते वृथा विदम् ॥२॥
अयि मानसहंसं त्वं हित्वा वाञ्छसि सद्गतिम् ।
कथं दुर्जनघूकौघात्किं वा बुद्ध्या समुज्झितः ॥३॥
किं वा सेवे नृपं याचे धनिनं वा निराश्रयः ।
इति चिन्ताकुलो मूढ नयस्येव वृथा वयः ॥४॥
तस्मादुत्तिष्ठ शरणं समपेहि महेश्वरम् ।
यदुपासनया सौख्यं किमन्यैश्चित्रविभ्रमैः ॥५॥
यत्सेवया विना लोके को वा सिद्धिमुपागतः ।
ननु तत्स्मरणे जन्म सफलं साधुषु स्मृतम् ॥६॥
यन्नामस्मरणादेव क्षीयते कर्मवासना ।

वित्तमेवंविधं ह्रित्वा कस्ते शरणदोऽपरः ॥७॥
दीनानाथैकशरणं वरेण्यं सिद्धिदायकम् ।
देवदेवं जगन्नाथं शरणं समुपैहि तम् ॥८॥
निजशक्तिप्रभावेण सृष्ट्वेदं निखिलं जगत् ।
अनुप्रविष्टस्तत्रासौ कुर्वंल्लीलां विभात्यजः ॥९॥
नमस्तस्मै भगवते पराय परमात्मने ।
अचिन्त्यगतये सर्गस्थितिप्रलयहेतवे ॥१०॥
योगिनो यं विचिन्वन्तो निर्मलेन समाधिना ।
दृष्ट्वा भवभवां भीतिं न पश्यन्ति कदाचन ॥११॥
तन्मनो यन्महेशानध्यानलीनं मनस्विनाम् ।
वचनं शिवनामैकवचनं खलु वाग्मिनाम् ॥१२॥
तच्चक्षुर्विमलं विश्वग्यत्पश्यत्यखिलेश्वरम् ।
तथैव श्रवणं शम्भुयशःश्रवणलोलुपम् ॥१३॥
वरं तन्मस्तकं शर्वप्रणामरचितादरम् ।
शरीरमपि देवेशसेवानुगतसौहृदम् ॥१४॥
जातास्तद्गतप्रलीनाश्च बहवो भववारिधौ ।
धन्यास्ते शिवनामैकरसा नरवरा भुवि ॥१५॥
न तीर्थानि तपो नैव क्रिया नेतुं पवित्रताम् ।
शुद्धेन मनसोद्गीतं शिवनाम यथा वपुः ॥१६॥
अशान्ताय प्रशान्ताय विगुणाय गुणात्मने ।
नमो भवाय शर्वाय श्रीकण्ठाय मृडाय च ॥१७॥
मानुषं दुर्लभं प्राप्य सर्वाशापूरकोद्धुरम् ।

धन्या भजन्ति दुःखौघहरं शरणदं हरम् ॥ १८ ॥
समले मानसेऽस्माकं वाणी चन्द्रकरोज्ज्वला ।
यद्विभ्राम्यति मन्ये तत्सौभाग्यं गिरिजापतेः ॥ १९ ॥
यदा शम्भो नवेष्वेव धृतो वाग्विभवो मया ।
शुष्कशष्पोपमं मन्ये शक्रासनपरिग्रहम् ॥ २० ॥
रोमाञ्चितं वपुर्नेत्रे बाष्पपूर्णे च गद्गदा ।
वाणी शिव शिवेत्येवं भवभक्तिजुषां नृणाम् ॥ २१ ॥
भवरुद्रोग्रशर्वेशशिवेशानेति भक्तितः ।
गद्गदं गद भो हर्षान्मा गा भूमण्डलं वृथा ॥ २२ ॥
कालकिंकरहस्तस्थपाशैर्नद्धं भयातुरम् ।
को मां मोचयितुं शक्तो विना त्वद्भृकुटिं प्रभो ॥ २३ ॥
अन्तरेण नृणां सम्यग्भवदङ्घ्रिनिषेवणाम् ।
विडम्बनैव पद्मस्थजलबिन्दुचलाः श्रियः ॥ २४ ॥
शरण्यं त्वां समाश्रित्य महेशं करुणानिधिम् ।
अनीशश्चेदहं दोषस्स मे प्राक्कर्मसम्भवः ॥ २५ ॥
मूढमूढविपद्वारमन्धमन्धकनाशकृत् ।
भवाब्धिमग्नं रात्र्यन्धहर तार प्रतारय ॥ २६ ॥
पर्यटन्संविशन्कर्म कुर्वञ्शिवपरायणः ।
यत्सुखं समवाप्नोति न तच्छक्रासनस्थितम् ॥ २७ ॥
अनागसमनाथं च कथं नेक्षसि मां प्रभो ।
त्वां विना कोऽपरो लोकेऽगतिकोद्धरणक्षमः ॥ २८ ॥
पदं नात्र करोषीश हृदि पापरतस्य मे ।

वद पूर्णकृपाम्भोधे कतमा स्याद्गतिः पुनः ॥२९॥
त्वत्परः को जगन्नाथ कर्णधारो भवाम्बुधौ ।
तारयत्युडुपं मूर्ध्ना धारयन्योऽखिलं जगत् ॥३०॥
कृतं कर्माशुभं प्राक्चेत्कथं शिवपरा मतिः ।
विमलं चेत्कथं नाथ शोकमोहादिकं त्विदम् ॥३१॥
मनुष्यनावमाश्रित्य त्वां च निस्तारकं प्रभुम् ।
सोऽहं वसामि चेद्देव वद कस्य विडम्बना ॥३२॥
याचे त्वामेव वरदं वरमेकं महेश्वर ।
भूयान्मम भवद्भक्तिर्लोकद्वयहितावहा ॥३३॥
पिता बन्धुस्सुहृत्स्वामी शरण्यस्सर्वदेहिनाम् ।
अनन्यशरणं नाथ रक्ष मां परमेश्वर ॥३४॥

इति यवनभाषापारङ्गमपण्डितश्रीवरविरचिते कथाकौतुके
पञ्चदशं कौतुकम् ॥

॥१५॥

समाप्तं कथाकौतुकं सम्पूर्णमिति ॥

Nach सम्पूर्णमिति folgt im Ms. noch:

शुभमस्तु सर्वजगतां परहितनिरता भवन्तु भूतगणाः ।
दोषाः प्रयान्तु शान्तिं सर्वत्र सुखी भवतु लोकः ॥

I.

Ich preise jenen von dem erhabenen Götterfürsten selbst gepriesenen hohen Glanz des Śambhu, den lauteren, bei dessen Anblick die obersten Yōgins in ihrer Verzückung alle Herrschermacht der Welt voller Wonne im Herzen trockenem Grase gleich achten, und dessen Segnung stets erlangt wird, wenn man auch nur einen einzigen Augenblick daran gedenkt. Nachdem ich mich vor Gaṇēśa, dem Beseitiger der Fluth der Hindernisse und vor jener Bhāratī, deren Gestalt in allen drei Welten erglänzt, verneigt habe, wird von mir die Erzählung hier, die sich in dem Buche des Persers findet, in frischer Sprache bearbeitet. In derselben Reihenfolge nämlich, in der Mallā Jyāma den Stoff seiner Geschichte geschildert hat, wird er jetzt von mir in Śloken beschrieben.

Erwecke, Herr, die Knospe Hoffnung durch den Frühling Gnade; Du wollest mir die daraus entstehende, ersehnte köstliche Frucht geben! Lass damit heute den Garten meines Geistes geschmückt sein; mit ihrem lauteren Wohlgeruche erfülle meinen Leib! Herrscher der Götter, zeige mir, der ich in der Blindheit der Unwissenheit befangen bin, das Licht in der werthlosen, von hundert Kümmernissen erfüllten Welt! Mein Herz gehe stets ganz darin auf, dir, Śambhu, eifrig zu dienen; diese meine Zunge sei beständig damit beschäftigt, die Fülle deiner Vorzüge zu nennen. Beschenke mich mit der wunderbaren Gabe der Wohlredenheit des Briefes Geistesschärfe, wodurch mir heilbringendes Gelingen meiner Unternehmungen zu theil werden wird. Meine Redeweise, die aus dem Schatzhause des Herzens Wortperlen auf der Waage deiner Anbetung abwägt, sei begleitet von goldenem Sinne. Es giebt ja keinen Halt in der Welt ausser dem Worte, wenn es, gepriesen von den Trefflichen, erglänzt in der Vereinigung mit der Hingabe an Śambhu. (10) Gegangen sind ja jene Dichterfürsten, die den heiligen Nektar der Lehrbücher getrunken und in den drei Welten wohlgefestigten, grossen Ruhm hinterlassen haben. Keiner von diesen Dichtern ist übrig geblieben, der im Stande wäre, die heute lebenden, selbst an Dichtergeist sehr

schwachen, zu unterrichten. Darum komm du heute, der du der Welt Heil und Unheil kennst und gewähre mir die Gabe der Dichtkunst, so wahr du die Kraft dazu hast. Jedoch die höchste Schilderung der Andacht, die unvergleichliche, die von jenem[1]) am Anfange im Gebete gegeben wird, die wird von mir am Ende gegeben. Ueberall gilt ja diese Reihenfolge: nachdem die alten Dichter eine von dem Affecte der Liebe getragene Geschichte erzählt haben, wird am Schlusse der Verklärte gefeiert. —

Da ist jenes Stirnjuwel der Päigambhara's, Mahāmada mit Namen, an den sich der Khedive (Dschāmī) mit einer Anrede wendete; und auf seinen Befehl hat dann der mächtige (Khedive), selbst reinen Sinnes, die Brücke zur Frömmigkeit geschlagen. Wegen meiner Unkenntniss des wahren Sachverhaltes und wegen der Verschiedenheit der Anschauungen vermag ich seine Grösse, wiewohl ich eifrig daran dachte, doch nicht zu verkünden: denn hier ist mein Geist voller Unsicherheit. Darum könnte mir eine geringe Unsicherheit zum Vorwurf gemacht werden. Dagegen feiere ich jetzt die Grösse des mit jenem Namen (Mahāmada) genannten Fürsten.

Heil dem Schah Mahāmada, der stolz darauf ist, seine Vorrechte auf gesetzlichem Wege erlangt zu haben; dem erlauchten Herrscher von Kaśmīr mit den Augen wie aufgeblühte Lotusse. (20) Das von dem Schöpfer erschaffene All hier, Festes und Bewegliches, das mannigfach Gestaltete, Welt Genannte, wie ein Menschenleib Wunderbare, ist jetzt durch jenen Fürsten Mahāmada, die Krone aller Erdherrscher, wahrhaft geschmückt, so wie der Leib durch das Auge. Welcher Fürst unter den Dichtern wäre denn fähig, die Majestät dieses Männerfürsten zu nennen, dessen leuchtender Ruhm die Erde hier erfüllt, mit Gewalt das Dach des Himmels durchbrochen und den göttlichen Aether erklommen hat, der dadurch überall durchlöchert worden ist, wodurch die irrige Meinung entstand, es seien Sterne? Während er die Erde beherrscht, nehmen die Unterthanen zumeist ihre Zuflucht bei dem Rechte, begegnen durch treffliche Thaten ihrer Schädigung und sind den Göttern ähnlich (25). Selbst der Herr des Tages verliert seinen Glanz, wenn er nach dem Süden kommt: jenes Ruhm aber schwand nicht, sondern wuchs noch, nachdem er diesen be-

1) Von dem Dichter des Originales.

siegt hatte. Im Kampfe mit den Schaaren der Feinde erscheint er wie Bhīma und Arjuna, er, der in seiner Freigebigkeit durch die Menge der Bedürftigen an Tugend stets über Karṇa steht. Ebenso wird er von den Frauen in der Liebe für Kandarpa gehalten, von den Ministern bei der Berathung immerfort für vorzüglicher als der Lehrer Kāvya [2]). Die Sonne selbst gab ihm aus Liebe die Hälfte ihres Glanzes und ist nun, die Vollleuchtende, durch ihn Tag und Nacht verdunkelt. Durch ihn, den Tugendeifrigen, der die Identität der früheren Dinge erkannt hat, sind, um der Liebe zu Indra willen, die Kühe vor der Tödtung bewahrt worden. Dieser an allen möglichen Tugenden Indra überlegene Oberherr, der seinen Zorn zügelt, wird mit Namen Śacīpati, gleichsam Śatamanyu, genannt. Er, der die Feinde im Kampfe besiegte und die Fehden beendigte, der Wächter seiner Stadt, der den Zorn fesselte, der ward durch die Verwüstung der Länder zum Puraṃdara. Der den Wald Feindesschaar, den weitausgebreiteten, verbrannt und durch die Berührung mit dessen Rauch selbst zu starkem Wachsthum gelangt, während die Bedeutung des Wortes Himmel verloren geht und die Sonne, selbst wenn sie in seiner Mitte steht, jetzt nur noch wie ein Funke erscheint — welcher Dichterfürst wäre wohl im Stande, das Feuer seiner Glut zu besingen? Gleichsam eine Bienenkette für den Handlotus, an den Nägellotussen von gelblicher Farbe; wie ein strömender Guss Brunstsaft, der aus den Schläfen eines brünstigen Elephanten kommt; eine Ranke von junger Blyxa octandra, gewachsen in dem Teiche Kraft; ähnlich der Rauchwolke von dem Feuer brennender Glutmacht: so glänzt in seiner Hand die Schwertklinge, an Gestalt gleich dem Haarschopfe der Frauen der Feinde, an Pracht ähnlich einer fliegenden wasserreichen Wolke.

Als die Regierung dieses Erdherrschers auf Erden blühte, in dem Jahre der Sonne Vikrama, das man zählt nach Muni, zwei, Veda, Mond (= 1427); als es ein Gemeinjahr war und acht Monde vollgeworden waren; im Monat Mādhava, am Vollmondstage, als die Sonne in das Zeichen des Widders getreten war: hat Mallā Jyāma einst das wundersame, aus dem Munde der Götter stammende Buch geschrieben, welches unter dem Namen

---

2) = Uçanas.

„Yōsōbha und Jōlēkhā“ berühmt ist. Hier habe ich, der Paṇḍit Śrīvara, zur Ergötzung des Fürsten in der Sprache der Götterwelt jetzt folgenden herzerfreuenden Anfang gedichtet, nachdem ich meinem Lehrer Namens Paṇḍit Jōnaka Ehrerbietung dargebracht habe. (40) Ein Wonnebringer für die Gelehrten, wie es die Lotusse trefflicher Lehrbücher für den Mānasa-See Geist sind; ein Lichtspender für die von der dichten Finsterniss Schein und Nichtwissen verhüllten Köpfe, seinem Worte getreu, seinen Zorn besiegend, der Führer des Kreises der Brahmanen, dem Heiligen zugethan, von trefflichem Wandel, stets von dem Herrscher verehrt; gesetzt, voll unzähliger Tugenden, ein Ergründer des Sinnes aller heiligen und profanen Ueberlieferung, Gefallen findend an der abendlichen Waschung, geehrt von den Schaaren der Schüler-Cakōra's; in der Versammlung wie der Lehrer (der Götter) erscheinend, mit einer Menge von Vorzügen begabt — so lebte mein Lehrer mit Namen Jyōtsnākara, stets eine Fundgrube für den Nektar der Rede, auf Erden, dem Bhava ergeben, vermögend und mit Ruhm geziert. (45)

Heil möge stets den Trefflichen wiederfahren, deren Herz in lauterer Freude erglüht und deren Sinne immer darauf gerichtet sind, anderen Unterstützung zu gewähren; die von selbst bravo rufen, wenn sie den Meister finden, der die höchsten Tugenden zeigt und die den Schwachen hilfsbeflissen nirgends verlachen. Deshalb haben die Dichter keine Furcht vor den Guten; was aber kann das Kläffen der Hunde Bösewichte bewirken? In dieser Erkenntniss will ich, der Gelehrte namens Śrīvara, wahrlich dieses an Affekten reiche Buch vollenden, welches die Bezeichnung Kathākāutukam trägt.

Es giebt in der Welt nichts Höheres mehr ausser der Liebe: denn daraus entsteht wiederum die heilbringende Entsagung. (50) Vermöge der Liebe schuf selbst der hochheilige Śiva dies alles, durch die Kraft des innigen Contactes. In jener blossen All-Einheit, die der Zweiheit entbehrte, der untadligen, die den Namen Welt noch nicht trug, lebte allein der höchste Herr. Als der Fürst der Götter das aus mannigfachen Formen bestehende, göttliche, von aller Schönheit begleitete, mit ungezählten Wundern gefüllte, untadlige, unvergängliche Selbst in der Spiegelscheibe seiner Wohnstätte selbst erblickte, in diesem Augenblicke empfand er hohe Wonne; und während Śiva der Gedanke kam, dies

jemandem zu zeigen, trat dieser sein aufsteigender bethörender Wunsch in die Erscheinung. (55) Nicht leicht ist ein Schöner im Stande, seine Schönheit zu verbergen: wenn das Fenster geschlossen sein sollte, wird er sie doch an der Thüre zeigen. Siehe diesen in der Erde verborgenen Hibiscus, wie er im Frühlinge sein Haupt durch die Kraft der Schönheit erhebt! Von der Kraft des Wunsches nach einem Contacte und von Liebe im Herzen erfüllt schuf der Gott, der höchste Gott, die Welt, sodass sie davon erfüllt ist. Nachdem aber der Allmächtige die mannigfach gestaltete Schöpfung geschaffen hatte, die von ihm selbst ein Erbtheil besitzt, erstrahlte er selbst, indem er in ihr aus Liebe bestehendes Scherzspiel einsetzte. Weil nun durch ihn das All, Bewegliches und Unbewegliches, aus dem Wunsche heraus und aus Liebe erschaffen ist, darum bleibt nirgends etwas ohne Liebe. (60) Nachdem er dann aus Liebe eine Dreizahl von Göttinnen durch seine Zaubermacht und ebenso aus seinem eignen Leibe drei Männer als Grundanfänge für die Welt geschaffen hatte, minnte er viele Jahre mit diesen nach Lust zusammen, worauf diese wiederum mit seiner Erlaubniss die Schöpfung schufen. Darum erglänzt die ganze beseelte und unbeseelte Welt in der Fülle der Liebe; und was ihrer ermangelt, zählt nicht mit. Wenn man so sieht, dass der fühllose Taglotus von Liebe zu dem Heissstrahler und der Nachtlotus von Liebe zu dem Nektarstrahler erfüllt sind, warum sollten dann die Menschen davon nicht getroffen werden? Die hohe Wonne der Liebe vermag ja kein Mensch zu nennen, der mit einer einzigen Zunge begabt ist und auch nicht, wenn er deren tausend hat. (65) Denn das gerade ist das Herrliche daran, dass sie die Genüsse erkennen lässt; alles andere nennen daher die Weisen reizlos. Wenn ein Herz die Qual der Liebe nicht kennt, dann ist das kein Herz; ein Leib, der von ihrer Pein verlassen ist, ist kein Leib, sondern nur ein Lehmklumpen. Wende das Gesicht ab von der Welt und richte das Antlitz freudig auf Jene: höher als die fleischliche Vereinigung gilt die Liebe, die den Liebenden Wonne bringt. Niemals sei der Gedanke an sie im Herzen aller schwach, niemals auch entbehre der Sinn der Verständigen ihrer. Einem Rade gleich dreht sich kraft derselben das Himmelszelt; von ihrem Getöse ist diese Welt erfüllt. (70) Wer ihr Sklave geworden ist, ist befreit von den Fesseln der Existenz; wer ihre Furcht im Herzen trägt, erlangt beständiges Glück. Der

Mann, welcher trunken von dem Genusse des Weines der Liebe so den Blick von der Welt abwendet, erachtet alles dies dem Grase gleich. Wenn die Leute nicht liebend aus dem Becher der Liebe trinken, soll niemand irgendwo ihren Becher nehmen. Hundertfach und tausendfach gesegnet und schön und hochalterig sind am Ende die, welche in dem Meere des Lebens versunken sind; aber wahrlich, ihr Name besteht durchaus nicht fort in der Welt, während die Kunde von den Liebenden ewig lebt und hier wie dort Wonne bereitet. (75) Es wird erzählt, dass einst ein Schüler immer wieder seinen Lehrer bat, der Ehrwürdige möge ihm die Weihe geben; und dieser, also von ihm gebeten, antwortete: „Wenn dein Herz erst einmal von Liebe erfüllt sein wird, dann will ich dir die Weihe geben!" — So lange ein Mann das Alphabet nicht lesen kann, so lange bleibt er ein Thor, wenn er auch den Inhalt der Veden und der Lehrbücher kennt. Lass die Furcht der Welt und übe Tag und Nacht den Hang nach Liebe; ein Mann, der sie erkannt hat, erlangt zweifellos die Erlösung. Dem Himmel sei Dank, dass ich, durch Schicksalsfügung frei von der Furcht, die aus der Welt entsteht, alle anderen Unternehmungen gelassen und diesen Weg betreten habe. (80) Wenn auch mein Haar der Farbe nach der Milch gleich geworden ist, so grünt doch täglich in meinem Herzen noch die Liebe. Einst, als ich allein nach Gefallen langsam meines Weges ging, erscholl eine Stimme vom Himmel, die mich wiederholt anredete: „Verfertige jetzt schnell ein affectereiches Buch, bei dessen Anhören selbst die Schaar der Heiligen von der Liebe verblendet wird! In der werthlosen Welt hat nichts Bestand; daher bleibt dir auf Erden nur die Kunde deines Buches hunderte von Weltzeitaltern leben." — Nachdem ich das göttliche Wort vernommen und es immer wieder erwogen habe, habe ich jetzt die wunderbare, reizende Erzählung geschrieben, nachdem ich es für gut erkannt habe. Hier lodert das Feuer der Liebe, voll sengender Glut; es fallen die Sterne vom Himmel, als Tropfen der Thränen aus den Augen der Götter.

Man sieht wiederum, dass das ganze All unterthan ist der Bhāratī: wem sie im Munde wohnt, wie soll der Schweigen beobachten, wenn er nur Verstand besitzt? Das Wort nämlich gilt als Maass aller Dinge; und wenn es lieblich ist, giebt es keinen anderen Gegenstand des Gewinnes. Was man hier alles

sieht, Altes oder Neues, das, wisse, ist aus dem Worte hervorgegangen; daran ist nicht zu zweifeln. „Gehe den Weg wie es bisher war“: nachdem ich also das Wesen des Wortes vernommen hatte, habe ich alles nach der Weisung des Götterfürsten aufmerksam gethan. (90) Veda, Tradition und Purāṇa's, Philosophie und Grammatik sind aus Worten zusammengesetzt, deshalb besteht die Welt aus dem Worte. Zweifach wird von den Weisen das Wort geschieden, je nachdem es wahr oder unwahr ist: hienieden schwer zu finden ist das wahrhaftige Wort, überall ist das andere zu finden. Ausser Jenem giebt es keine höchste Tugend, die lieb und schön wäre; beständig ist die Wahrheit zu sagen, wenn man jegliche Vollendung ersehnt. Zweierlei bildet seinen Schmuck: Wahrhaftigkeit und Kürze, wie bei einem verständigen Manne hienieden Geduld und Charakter. Dies mein Buch hier nun, welches mit jenen beiden Dingen versehen und voller Affecte ist, möge der Liebling der Liebenden sein und den Trefflichen Freude bereiten! (95)

*

II.

Es war im Westen ein Erdherrscher namens Tāimōsa, erhaben wie Vikrama, dessen Gebot von vielen Juwelen unter den Herrschern geachtet ward. Unter seines Armes Kraft war die meerumgürtete Erde stets froh und im höchsten Maasse versehen mit allen möglichen Glücksgütern. Zur Zeit der Ehrfurchtsbezeugung erstrahlte sein Leib hoch über den niederfallenden Königen durch den Glanz ihrer Diademe wie aus Edelsteinen gefertigt. Nichts Glückbringendes kannte dieser Tugendsinnende ausser der Tugend, der vor dem Schicksale nicht bangte; wie viel weniger vor seinen Feinden! Bei dem Hören seines Namens ging den Frauen der Feinde die Leibesfrucht ab; während er die Erde beherrschte, war in der Welt keine Furcht vor Sorge und Krankheit. (5) Er hatte eine gar herzerfreuende Tochter namens Jōlēkhā: welcher Dichter sollte wohl im Stande sein, deren Schönheit zu besingen? Wenn ihre Reize nach Kräften geschildert werden müssen, wird dadurch diese meine Zunge des rechten Namens erst recht werth. Diese Königstochter hatte dunkle Hautfarbe, Gazellenaugen und schlanken Wuchs, ein Gesicht wie der Vollmond, eine Stimme, lieblich wie die der Nachtigall, Bimbalippen und den Gang des Elephanten; gebeugt war

sie durch die Last der Brüste, und ihre Zähne glichen einer Perlenkette. Herrlich erstrahlte ihr Gesicht durch die Lockenringel, gleichsam ein gefülltes Schatzhaus, beschützt von einer Schaar von giftlosen Schlangen. Zweierlei sah man an ihr ganz Ausserordentliches, welches das Herz bethörte: den Tag, der aus der Schönheit ihres Gesichtes entsprang und die Nacht, die aus ihren Locken kam. (10) Ihre Brüste waren wie zwei Wasserrosen, schön gerundet, von zarter Schönheit, dem Meere der Anmuth entsprossen, gleichsam zwei Blasen voll Kampfer. Nicht flüssiges Silber, nicht der Schnee liess sich vergleichen mit den Armen der Gazellenäugigen, nicht der Lotusstengel: Mängel zeigt er ja! An ihrem Halse, der drei Falten im Nacken zeigte, glänzte eine Reihe von Schnüren reinster Perlen: eine Schaar Sternbilder, gekommen, um den Antlitzmond zu verehren! Wie soll die Fleckenlosigkeit dieser Gazellenäugigen beschrieben werden, bei deren Anblick der Spiegel einen Fleck, angeblich Hauch, zeigte! Die Flamingos und die Schlangen zogen sich in den Wald zurück, diese an Schlankheit, jene an Anmuth des Ganges besiegt von der Gazellenlammäugigen. (15) Als die Apsarasen sie erblickt hatten, schlossen sie die Augen nicht mehr; ihren eignen Leib sahen sie nicht wieder an, krank vor Abscheu. Eine solche reizvolle Schöne, die mit Liebreiz und Anmuth ausgestattet und in dieser Welt nur schwer zu erlangen ist — von der hörte man wohl früher, sah sie aber nicht. Als die Nāga-Mädchen, ihre Altersgenossinnen, hörten, dass sie so ausserordentlich schön sei, hielten sie sich die Ohren zu, schlossen die Augen, gingen alle in die Unterwelt und kamen nicht wieder hervor. Wie gelangte die stets im Lotus wohnende Padmā in einen (anderen) Lotus? — Indem sie in der Gestalt des Fussringes an deren Fusslotus ging! Der wunderthätige Schöpfer, der dies alles schuf, ist allein im Stande, ihre Schönheit zu schildern, kein Anderer. (20) So war die Königstochter beschaffen, die, im Palaste wohnend und von der Schaar ihrer Gespielinnen umgeben, beständig mit Eifer dem Spiele mit Puppen oblag. Ein angenehm kühler Wind wehte, sie zu bedienen, während sie im Palaste weilte; aber Sonne und Mond trafen sie nicht mit ihren Strahlen. Wie die berühmte Viṣṇumāyā durch ihren Anblick alles bethört, so that auch die Königstochter. Höre, was die heimlich waltende, ungesehene Māyā Schicksal an diesem also dahinlebenden Mädchen thun

wird. Verneigung ihm, dem hehren, mächtigsten, höchsten Wesen, durch dessen Blendwerk alle Götter, Indra an der Spitze, bethört worden sind. (25)

Einstmals war Jōlēkhā, vom Spiele ermüdet, bei Anbruch der Nacht eingeschlafen, nachdem sie das Paar ihrer Fusslotusse auf den Schooss eines Kammermädchens gelegt hatte. Solche Wonne brachte die Nacht den lebenden Wesen, dass die entschlummerten Menschen gar nichts wahrnahmen. Fröhlich tranken die cakōrās mit schnappendem Schnabel den lieblichen Mondschein, wobei sie süssen Sang ertönen liessen. Keiner wachte, ausser dem Geliebten der Nacht, die in gewohntem Gange dahinschritt, sonst aber niemand. Alle Wächter waren im Herzen von Träumen befangen, und die Thürhüter stützten ihre Häupter auf ihre goldenen Stäbe. (30) In den Teichen schliefen die Fische; die Reiher riefen nicht mehr; es bangte alleine noch der arm cakravāka. Sanft entschlummert erwartete die fromme, sonnenfrohe Lotusblume den Mond, nachdem sie in ihrem Kelche einen Bienenjüngling eingeschlossen hatte. — So ruhte also die mit Schönheit und Tugend geschmückte Königstochter auf einem schönen, mit Juwelen verzierten und mit Blumen bestreuten Ruhebette. Da schlief das an wunderbaren Vorzügen reiche Mädchen mit dem leiblichen Auge, mit dem Herzen aber war sie wach. Als die Mitternacht gekommen war, wo die Leute schliefen, sah die holdlächelnde Königstochter im Traume durch die Hausthür einen Mann eintreten (35) mit schönem Haupte, schöner Stirn, schönem Brauenspiel, herrlichen Wimpern, schönen Augen, frischen Wangen, schöner Nase und berückend lächelndem Munde; mit sehr schönem Antlitz, lieblichem Halse und gewaltigen Löwenschultern, mächtiger Brust und grossen Armen; sehr jugendzart war er, in schöner Gewandung, Schläfenlocken trug er, der Dunkle, glänzend durch die Härchenreihe; einen schönen Nabel hatte er, gleichgebaute Knöchel und sehr schöne Lotusfüsse. Sein Körper war mit Sandel gesalbt; den besten Betel trug er; mit allen Malen war er wohl versehen, sein Leib erstrahlte gar herrlich. Durch seine Anmuth besiegte er den Mond, durch seinen Glanz machte er die Sonne untergehen; dem Bṛhaspati glich er in der Versammlung, wunderbar hoheitsvoll war sein Anblick. (40) Die Welt zu bethören war er gekommen, nachdem er den Leib des Liebesgottes angenommen hatte und zwar leibhaftig, um den Makel der

Körperlosigkeit auszutilgen. Niemals hatte man ihn früher gesehen, noch hatte die Kunde von ihm den Weg zum Ohre gefunden; selbst im Geiste hatte man ihn sich nicht vorgestellt, ihn, der im höchsten Grade einem Göttersohne glich. — Als er seine Schönheit gezeigt hatte, verliess er ihr Haus wieder, nachdem er ihr alle Besinnung geraubt und ihr das Herz sorgenkrank gemacht hatte.

